


# 11. वयम् स्वास्थ्यरक्षकाः



अहम् कदलीवृक्षः अस्मि
मम पत्राणि विशालानि सन्ति।
एतत् मम कदलीफलम्।
एतस्य वर्णः हरितः भवति।
यदा एतत् पक्वं भवति, तदा एतस्य वर्णः पीतः भवति। जनाः एतत् खादन्ति स्वस्थाः च भवन्ति।





अहम् नरङ्गवृक्षः।
मम पत्राणि अति लघूनि
मम पुष्पं रक्तवर्णस्य भवति
मम आकारः लघुः परन्तु कार्यं महत्।
अहं रुगणानां बहु सेवां करोमि।
मम फलं नारङ्गम् शरीरस्य तापस्य रक्षकः।
उपक्वम् एतत् हरितवर्णम्, पक्तं च पीतवर्णम्।
यदा-कदा पक्वानि अपि हरितानि भवन्ति।



अहं सेववृक्षा:।
मम फलं 'सेवफलम्' एतत् हरितवर्णं रक्तवर्णं पीतवर्णं च भवति। मम फले अय: शक्ति:।
कथ्यते च –"य: एकं सेवफलं प्रतिदिनं खादति, स: सदैव नीरोगी भवति।"
उपकारे एव मम विशवास:

अहंत दाडिमवृक्ष:।
मम रक्तानि लघुपुष्पाणि दीपवत् सुन्दराणि भवन्ति।
मम फलं दाडिमं मञ्जूषावत् अस्ति। अस्मिन रसयुक्तानि बीजानि भवन्ति। एतानि रक्तवर्धकानि भवन्ति।
परोपकाराय एव मम जीवनम्।








अहं आम्रवृक्ष:।
मम फलं फलानां राजा मन्यते।
मम फलानाम् अनेके उपयोगा:।
कोकिल: मम शाखास स्थित्वा मधुरगानेन सर्वेषां चित्तं हरति सुखं च यच्छति।

वयं सर्वे जनानां सेवां
कुर्मः वयम् जनानाम्
स्वास्थ्यस्य रक्षकाः।




# अनुशीलनम्

**1. चित्रं पश्यत्, फलस्य नाम लिखत**



यथा

कदलीफलम् ________ ________ ________


________ ________ ________ ________


________ ________ ________ ________

## 2. वृक्षाणां चित्राणि पश्यत, वृक्षाषां नामानि लिखत

यथा



**आम्रवृक्षः**



-------- -------- -------- --------

## 3. 'आम्' अथवा 'न' इति रूपेण उत्तरं लिखत

| | | आम्/न |
|---|---|---|
| यथा | किं कदलीफलं नीलं भवति? | ---- / न |
| (i) | किं सेवफले अयः शक्तिः भवति? | ---- / ---- |
| (ii) | किं द्राक्षाफलानां वृक्षाः भवन्ति? | ---- / ---- |
| (iii) | किं कोकिलः आमृवृक्षे गायति? | ---- / ---- |
| (iv) | किं दाडिमफलं मञ्जूषावत् भवन्ति? | ---- / ---- |
| (v) | किं कदलीपत्राणि लघूनि भवन्ति? | ---- / ---- |
| (vi) | किं नारङ्गस्य रसः तायं वर्धयति? | ---- / ---- |

## 4. एकवचनात् बहुवचने परिवर्तनं कुरुत

| | | | | |
|---|---|---|---|---|
| यथा | आम्रस्य | वृक्षः | आम्रणमं | वृक्षाः। |
| (i) | सेवस्य | रसः | ------ | रसाः। |
| (ii) | वृक्षस्य | छाया | ------ | छायाः। |
| (iii) | फलस्य | वर्णः | ------ | ------ |
| (iv) | पत्रस्य | उपयोगः | ------ | ------ |
| (v) | जनस्य | सेवा | ------ | ------ |
| (vi) | बालकस्य | स्वास्थ्यम् | ------ | स्वास्थ्यम् |

(जनानाम्, फलानाम्, बालकानाम्, पत्राणाम्, सेवानाम्, वृक्षाणाम्)

## 5. विलोमशब्दानम् मेलयत

| | | |
|---|---|---|
| (i) | पक्वम् | (क) लघु |
| (ii) | विशालम् | (ख) आगच्छति |
| (iii) | शमयति | (ग) अपक्वम् |
| (iv) | गच्छति | (घ) स्वस्थः |
| (v) | कग्णः | (ङ) वर्धयति |

## 6. विशेषण-विशेष्यं योजयत

| | विशेषणानि | विशेष्याणि |
|---|---|---|
| (i) | कृष्णः | (क) फलम् |
| (ii) | पक्वम् | (ख) फलानाम् |
| (iii) | शुष्काणाम् | (ग) बीजानि |

| | | | |
|---|---|---|---|
| (iv) | सौन्यर्दभयानि | (घ) | वर्णः |
| (v) | रसमयानि | (ङ) | उपयोगान् |
| (vi) | विविधानम् | (च) | पुष्पाणि |